# Shri Vyasa Stuti 2 or Shri Vasishtha Krishna Ashtakam

# श्रीव्यासस्तुतिः २ अथवा श्रीवासिष्ठकृष्णाष्टकम्

## Document Information

Text title : Shri Vyasa Stuti 2 or Shri Vasishtha Krishna Ashtakam

File name : vyAsastutiH2.itx

Category : deities_misc, gurudev, vAdirAja, aShTaka

Location : doc_deities_misc

Author : Vadiraja

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 29, 2021

*sanskritdocuments.org*

Shri Vyasa Stuti 2 or Shri Vasishtha Krishna Ashtakam

# श्रीव्यासस्तुतिः २ अथवा श्रीवासिष्ठकृष्णाष्टकम्

श्रीशं विचित्रकवितारसपूरिताशं
श्रीशङ्करोरग खगेन्द्र हृदब्जवासम् ।
आशङ्कमान जनतृप्तिकरोऽतिहासं
व्यासं नतोऽस्मि हरितोपलसन्निकाशम् ॥ १॥

वेदान्तसूत्र पवनोद्धूत पञ्चवेदा
मोदांशतोषित सुरर्षिनरादिभेदाम् ।
बोधाम्बुजात लसितां सरसीमगाधां
श्रीदां शितोऽस्मि शुकतातपदामखेदाम् ॥ २॥

द्वैपायनो जयति यन्निजशक्तिदीपः
पापाभिवर्धित कुवादितमिस्त्रतापः ।
पापाख्यदुर्भगदशाकृति तीव्रकोपः
पापाद्भुतौषधिरगे श्वसनांशरूपः ॥ ३॥

इन्द्रादिदैवत हृदाख्य चकोरचन्द्रा
मन्दाशु कल्पशुभ जल्पित पुष्पवृन्दः ।
वृन्दारकाङ्घ्रिपलता गुणरत्नसान्द्रो
मन्दाय मे फलतु कृष्णतरुः फलं द्राक् ॥ ४॥

माताहितेव परिरक्षतियेन गीता
गीताग्र्य भारत पुराणकृताविगीता ।
वातांश मध्ववरदः सगिरो ममैताः
ख्याता पराशरसुतो विदधातु धाता ॥ ५॥

पारं भवाख्यजलधेर्भुवनैकसारं
स्वैरं कृतोरुविध वेद पथ प्रचारम् ।
आरञ्जितामरजनं सुखचिच्चरीरं
धीर स्मरामि हृदि सत्यवतीकुमारम् ॥ ६॥

भावाश्रितं यमनुसृत्य भजन्ति देवाः
    सेवारताश्च मुनयः कवयोनृदेवाः ।
यो वासुदेव वपुरस्य महानुभावां
    च्छ्रिबादरायण हरेर्न गृणीत कोवा ॥ ७॥

ज्ञानं प्रदेहि भवदागमवार्ध्यधीनं
    श्रीनन्दसूनु पदभक्ति नदीनिदानम् ।
आनन्दतीर्थवरदोच्च महाध्वनीनं
    दीनं बदर्यधिपते कुरु माममानम् ॥ ८॥

वासिष्ठवंशतिलकस्य हरेर्मनोज्ञं
    दोषौघखण्डनविशारदमष्टकं ये ।
दासाः पठन्त्यनुदिनं भुवि वादिराज
    धीसम्भवं परिभवो न दिशाशु तेषाम् ॥ ९॥

इति श्रीवादिराजयतिविरचिता व्यासस्तुतिः समाप्ता ।

Encoded and proofread by Krishnananda Achar

*Shri Vyasa Stuti 2 or Shri Vasishtha Krishna Ashtakam*

pdf was typeset on August 29, 2021

Please send corrections to *sanskrit@cheerful.com*